## (इष्णुच्प्रत्ययः एकमवलोकनम् ।)

## 5. चरिष्णुः ।

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची ।)*

द्वारकायां नारदागमनं श्रीकृष्णं प्रति शक्रसन्देशकथनञ्च वर्णयति माघस्याद्याध्यायः। अथ शिशुपालो हन्तव्य इति वक्तुं तस्यावश्यवध्यत्वेऽनन्यवध्यत्वज्ञापनौपयिकतया औद्धत्यप्रकटनार्थं जन्मान्तरवृत्तान्तं तावदुद्घाटयति –

"स **सञ्चरिष्णु**र्भुवनान्तरेषु यां यदृच्छयाशिश्रियदाश्रयः श्रियः।
अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः।।" इति। (शिशुपालवधम्.1.46.)

भुवनान्तरेषु **सञ्चरिष्णुः** = सञ्चरणशीलः लक्ष्म्या आश्रयः स हिरण्यकशिपुः यदृच्छया यां दिशमगमत्, शिरसि बद्धाञ्जलिभिः देवैः त्रिसन्ध्यं तस्यै दिशे हस्तैः नमस्कारोऽकारि कृतम्। संध्यावन्दनेऽपि दिङ्नियमं परित्यज्य तदागमनभयात्तस्यै दिशे नमस्कारः कृत इति भावः। स्वैरवृत्तिरयं भुवनान्तरसञ्चारी देवानपीपिडत् इत्यर्थः। अत एवोक्तं 'स सञ्चरिष्णुर्भुवनान्तरेष्विति'। कथमिदं सञ्चरिष्णुपदं निष्पन्नम् ? कुतः सन्देहः ? 'चर गत्यर्थकः' (भ्वा.569) । अस्मात् "अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्**मदरु**च्यपत्रपवृतुवृधुसहचर इष्णुच्" (पा.सू.3.2.136) इति सूत्रेण तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु इष्णु(च्) प्रत्ययो विधीयते। 'चरिष्णु जङ्गमचरं त्रसमिङ्गं चराचरम्' इत्यमरः। अत्र सूत्रे 'चर' धातुः निर्दिष्टः। तत इष्णुच्प्रत्यय इति। उदाहरणे तावदयमुपसर्गमुपाचरति **'सञ्चरिष्णुः'** इति। अतः सन्देहः। न खलु तावत्कार्कश्यमस्य विधेः (सूत्रस्य)। अलंकृञित्यादौ पुनः उपपदनिर्देशः कृतः। चरतिस्त्वनुपपद एव सूत्रे उपात्तः। अतः इष्णुच्प्रत्ययः, 'अलङ्कृञ्निराकृञ्प्रजना'द्युपपदपूर्व

केभ्यो धातुभ्यः, एवं उपपदनिर्देशाभावात् चरादिभ्य उपपदाऽसंश्लिष्टेभ्यश्चैव भवतीति खलु भवतः कल्पना ? मा भूदेवम्। इत्थं ब्रूमः। उपपदपूर्वकेभ्यस्तु यथोक्तमेवास्तु। तदितरत्र (अर्थाच्चरादौ) सह चर इत्येतेभ्यो धातुभ्यः इष्णुच्प्रत्ययो भवतीत्येवालम्। संश्लिष्टा वा असंश्लिष्टा वा इति न विचारः। येषां पुनरुपपदनिर्देशः कृतः, 'अलंकृञित्यादि', तेषां तेषूपपदेष्वेवेष्णुच् इति मन्महे। नाऽतो दोषः।

भट्टिकाव्ये वर्षर्तुवर्णनाप्रसङ्गे मेघवृष्टिमाख्यन् कविः अनुपश्लिष्टं चरिष्णुमुदाहरति –

"......भान्तस्तडित्वन्तश्**<u>चरिष्णवः</u>**।।" इति। (भट्टिकाव्यम्.**7.3.**)

महाकवेरयं प्रयोगः। एतादृशमहाकविप्रयोग एव साधुत्वे प्रमाणम्। प्रमादवशात्प्रयोगासाधुत्वं यद्यपि कस्यचिदेकस्य स्यात्तथापि सर्वे न प्रमादानुकारिणः कवय इत्यतः माघप्रयोगं द्रढयति भट्टिप्रयोगः। **<u>(5.चरिष्णुः।)</u>**

## <u>6.सहिष्णुः।</u>

"अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः।

यमिन्द्रशब्दार्थनिसूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते।।" इति। (शिशुपालवधम्.**1.42.**)

निर्भीकः तपनद्युतिः = सूर्यतापः , सूर्यतापवत्प्रभाववानित्यर्थः। इन्द्रस्यैश्वर्यनिहन्ता हिरण्यकशिपुर्नामा दैत्योऽभूदिति भावः। 'शिशुपालो हन्तव्यः' इति रूपं शक्रसन्देशमुद्धरन् ब्रह्मर्षिर्नारदः तस्य शिशुपालस्यौद्धत्यप्रकटनार्थं जन्मान्तरवृत्तान्तमित्थं स्मारयति। स च दैत्यो विष्णुना नृसिंहरूपेण उरोविदारं प्रतिचस्करे =हतः। ततः –

"विनोदमिच्छन्नथ दर्पजन्मनो रणेन कण्ड्वास्त्रिदशैः समं पुनः।

स रावणो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः।।" इति। (शिशुपालवधम्.**1.48.**)

अथ सः हिरण्यकशिपुः भूयोऽपि रावणो नाम राक्षसो बभूव। प्रसिद्धाः इमाः कथाः। तत्पुनरिह किमर्थमावर्त्तते ? कथालापमात्रं न लक्षितमस्माभिः। इष्णुच्प्रत्ययान्तशब्दमुद्धर्तुकामा वयम्। यथा –

"बृहच्छिलानिष्ठुरकण्ठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः।
जगत्प्रभोरप्र**<u>सहिष्णु</u>** वैष्णवं न चक्रमस्याक्रमताधिकन्धरम्।।" इति। (शिशुपालवधम्.**1.54.**)

सकललोकैकस्वामिनोऽप्रसहिष्णु वैष्णवं चक्रं सुदर्शनमस्य सुरद्विषो रावणस्य कन्धरायां नाक्रमत = अप्रतिहतं न क्रमते स्म = न प्रवर्तते स्म। (किन्तु प्रतिहतमेवेत्यर्थः) कीदृशं तत् सुदर्शनमित्युक्तौ बृहति शिलेव निष्ठुरे कण्ठेऽभिघाताद्विक्षिप्ताः लोलाश्चाग्निस्फुलिङ्गाः यस्य तादृशं वैष्णवं सुदर्शनचक्रमित्यर्थः। तच्च चक्रमप्रसहिष्णुः। अनभिभावकमित्यर्थः। 'सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी'त्यमरः। 'षह मर्षणे' (भ्वा.**852**) इत्यस्मादिष्णुच्। भट्टिकाव्ये 'तानि (राक्षांसि) द्विषद्वीर्यनिराकरिष्णुः तृणेढु रामः सह लक्ष्मणेन।' इति विश्वामित्रवाक्यश्रवणानन्तरं राज्ञो दशरथस्यावस्थां वर्णयन् **<u>'सहिष्णु'</u>** शब्दमुद्धरति कविः –

"स शुश्रुवांस्तद्वचनं मुमोह राजाऽ**<u>सहिष्णुः</u>** सुतविप्रयोगम्।
अहंयुनाऽथ क्षितिपः शुभंयुरूचे वचस्तापसकुञ्जरेण।।" इति। (भट्टिकाव्यम्.**1.20.**)

विश्वामित्रवचनमाकर्ण्य पुत्रविरहम**<u>सहिष्णुः</u>** = सोढुमसमर्थः राजा दशरथो मुमूर्च्छ। अथ मूर्च्छापगमानन्तरम् अहङ्कारवता तपस्विप्रवरेण विश्वामित्रेण शुभान्वितः पार्थिवः वाक्यमूचे = जगादेत्यर्थः।

एवं "तान् विलोक्या**<u>सहिष्णुः</u>** सन् विललाप......." (भट्टिकाव्यम्.**7.4.**) "...... **<u>सहिष्णू</u>** च चेरतुः खरदूषणौ।।" (भट्टिकाव्यम्.**5.1.**) इत्यादि भट्टिप्रयोगाः। **<u>(6.सहिष्णुः।)</u>**